दिनाङ्क: 12.02.2026

प्रात: - 06:55

## वित्तमन्त्री

वित्तमन्त्री-पदासीना निर्मला सीतारमन् वर्या सबलं प्रतिपादितवती यत् प्रशासनं अजीविकोत्पादनाय श्रमप्रधानक्षेत्रेषु सूक्ष्मलघुमध्यमोद्योगेषु, सहैव सुदृढ- आधारभूत-अवसंरचनायाः निर्माणे केन्द्रीभूतम् अस्ति। केन्द्रीयमन्त्री ह्यः लोकसभायां अस्य वर्षस्य वित्तसङ्कल्पनापत्रकम् आलक्ष्य प्रचलितायाः चर्चायाः अन्तर्गतं एकस्मिन् प्रश्नस्य प्रत्युत्तरे स्वीय वक्तव्यमिदं प्रदत्तवती।

वित्तमन्त्रिणा अस्य मासस्य प्रथमे दिनाङ्के संसदि केन्द्रीय-वित्तसङ्कल्पनापत्रकं प्रस्तुतम्।

## किरेन रिजिजू

संसदीयकार्यमन्त्री किरेन-रिजिजू उक्तवान् यत् भाजपादलं लोकसभायां राहुलगान्धिनं विरुध्य केन्द्रीयायव्ययप्रपत्रम् अधिकृत्य चर्चाविधौ उदीरितान् मिथ्यारोपान् विरुध्य प्रिविलेज-नोटिस इति सञ्चेतनां प्रख्यापयिष्यति। मन्त्री संसदपरिसरे वार्ताहरैः सह संवादम् अकरोत्। रिजिजू वर्यः काङ्ग्रेसनेतारं भृशं कट्वालोचितं यत् काङ्ग्रेसनेता प्रधानमन्त्रिणं नरेन्द्रमोदिनं विरुध्य मिथ्यारोपम् आरोपयति रति।

## लोकसभाध्यक्ष

लोकसभाध्यक्षस्य ओम् बिरला वर्यस्य निष्कासनार्थं काङ्ग्रेसदलस्य नेतृत्वयुतैः दलैः प्रदत्तस्य अविश्वास-प्रस्तावस्य सूचनायां वित्तसङ्कल्पनापत्रकसत्रस्य द्वितीये चरणे विचारं भविष्यति।

अस्य सत्रस्य द्वितीयचरणं मार्चमासस्य नवमदिनाङ्कादारभ्य अप्रैलमासस्य द्वितीयदिनाङ्कं यावत प्रचलिष्यति।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्रमोदी रोल्स-रॉयस-संस्थानस्य मुख्य-कार्यकार्यधिकारिणा तुफान एर्गिनबिलजिक इत्यनेन सह मेलनम् अकरोत्। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे श्रीमोदिना लिखितं यत् भारते स्वस्य कार्याणां संवर्धनाय रोल्स-रॉयस- संस्थानस्य उत्साहस्य अथ राष्ट्रस्य नवान्वेषीभिः गतिशीलैः च युवकैः सह सहभागितायै भारतं स्वागतं करोति इति।

<u>इजराइल पीएम्- ट्रम्प</u>

इजरायलदेशस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू ह्यः रात्रौ व्हाइट हाउस इत्यत्र अमेरिकायाः राष्ट्रपतिना डोनाल्ड ट्रम्प इत्यमुना सह मेलनम् अकरोत्। उपवेशनमिदं त्रिहोरा यावत् प्रचलितम्। तदनन्तरं इजराइलदेशस्य प्रधानमन्त्री कामपि टिप्पणीं न प्रदत्तवान्।

<u>बाङ्गलादेश</u>

बाङ्गलादेशे अतिसुरक्षायाः मध्ये अद्य राष्ट्रीयसंसदीय-निर्वाचनाय मतदानं भविष्यति। मतदानम् अद्य प्रातः सार्धसप्तवादने आरप्स्यते तथा सायं सार्धचतुर्वादनं यावत् नवनवत्यधिकद्विशत-निर्वाचनक्षेत्राणां नवसप्तत्यधिक–सप्तशतोत्तर–द्विचत्वारिंशत्-केन्द्रेषु प्रचलिष्यति। शेरपुर-त्रि इत्यत्र एकस्य प्रत्याशिनः निधनानन्तरं मतदानं स्थगितं जातम्। निर्वाचनायोगेन संसूचितं यत् सप्तसप्तति-लक्षाधिक-द्वादशकोटि-मतदातारः सन्ति। सम्पूर्णेऽपि देशे सैन्येन समर्थिताः प्रायः अष्टपञ्चाशत्-सहस्राधिक-नवलक्ष-विधिप्रवर्तनकर्मचारिणः नियुक्ताः सन्ति।

<u>क्रिकेट</u>

आईसीसी पुरुष-विंशति-प्रतिविंशति-क्रिकेट्-विश्वचषक-क्रीडायां वेस्टइण्डीजदलेन ह्यः रात्रौ मुम्बय्याः वानखेड़े-क्रीडाङ्गणे ग्रुपसी इत्येतस्य द्वन्द्वे इङ्ग्लैण्डदलं त्रिंशदङ्कै पराजितम्। अद्य भारतं सायं सप्तवादने दिल्ल्याः अरुणजेटलीक्रीडाङ्गणे नामिबियादलं सम्मुखीकरिष्यति। तत्रैव श्रीलङ्कादलं प्रातः एकादशवादने बालागोला इत्यत्र ओमानदलं सम्मुखीकरिष्यति। सहैव मध्याह्ने त्रिवादने मुम्बय्याः वानखेडे-क्रीडाङ्गणे नेपालदलं इटलीदलं सम्मुखीकरिष्यति।